नंतये नमो नमोऽनंतदयैकसिंध
वे ॥ नधर्मनिष्ठोस्मि न चात्मवे
दी न भक्तिमां स्त्वच्चरणारविंदे ॥ अकिं
चनो नन्यगतिः सरण्य त्वत्पादमूलं
शरणं प्रपद्ये ॥२५॥ न निंदितं कर्म तदस्ति
लोके सहस्रसो यन्न मया व्यधायि ॥
सोहं विपाकावसरे मुकुंद क्रंदामि सं
प्रत्य गति स्तवाग्रे ॥२६॥ निमज्जतो नं
त भवार्णवांत श्चिराय मे कूल मिवा
सि लब्धः ॥ त्वयापि लब्धं भगवन्निदा
नी मनुत्तमं पात्र मिदं दयायाः ॥२७
अभूत पूर्वं मम भावि किंवा सर्वं सहे
मे सहजं हि दुःखम् ॥ किंतु त्वदग्रे
सरणागतानां पराभवो नाथ नतेऽनु
रूपः ॥२८॥ निरासकस्यापि न ताव
दुत्सहे महेस हातुं तव पादपंकजम्
रुषा निरस्तोपि शिशुः स्तनंधयो नजा
तु मातुश्चरणौ जिहासति ॥२९॥ तवा
मृतस्यंदिनि पादपंकजे निवेशिता
त्मा कथ मन्य दिच्छति ॥ स्थितेर
विंदे मकरंद निर्भरे मधुव्रतो ने
क्षुरसं हि वीक्षते ॥३०॥ त्वदंघ्रि

मुद्दिश्य कदापि केनचिद्यथा तथा
वापि सकृत्कृतोंजलिः तदैव मुष्णा
त्यशुभान्यशेषतः शुभानि पुष्णा
ति न जातु हीयते ॥३१॥ उदीर्णसंसार
दवाशुशुक्षणिं क्षणेन निर्वाप्य परां च
निर्वृतिम् ॥ प्रयच्छति त्वच्चरणारु
णांबुजद्वयानुरागामृतसिंधुशीकरः
३२॥ विलासविक्रांतपरावरालयं न
मस्यदार्तिक्षपणे कृतक्षणम् ॥ धनं
मदीयं तव पादपंकजं कदा नु साक्षा
त्करवाणि चक्षुषा ॥३३॥ कदा पुनः शं
खरथांगकल्पकध्वजारविंदांकुश
वज्रलांछनम् ॥ त्रिविक्रम त्वच्चर
णांबुजद्वयं मदीयमूर्द्धानमलंक
रिष्यति ॥३४॥ विराजमानोज्वलपी
तवाससं स्मितातसीसूनसमामलच्छ
विम् ॥ निमग्ननाभिं तनुमध्यमुन्न
तं विशालवक्षःस्थलशोभिलक्षणम्
३५॥ चकासतं ज्याकिणकर्कशैः शुभै
श्चतुर्भिराजानुविलंबिभिर्भुजैः॥
प्रियावतंसोत्पलकर्णभूषणश्लथा
लकाबंधविमर्दशंसिभिः ॥३६॥

उदग्रपीनांसविलंबिकुंडलालकावली
बंधुरकम्बुकंधरम्॥ मुखश्रिया न्यकृ
तपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहो
ज्वलश्रियम्॥३७॥ प्रबुद्धमुग्धाम्बु
जचारुलोचनं सविभ्रमभ्रूलतमु
ज्वलाधरम्॥ शुचिस्मितं कोमलगंडमु
न्नसं ललाटपर्यंतविलंबितालकम्
३८॥ स्फुरत्किरीटांगदहारकंठि
कामणींद्रकांचीगुणनूपुरादिभिः॥
रथांगशंखासिगदाधनुर्वरैर्लस
त्तुलस्या वनमालयोज्वलम्॥३९
चकर्थ यस्या भवनं भुजांतरं तव
प्रियं धाम यदीयजन्मभूः॥ जगत्स
मस्तं यदपांगसंश्रयं यदर्थमंभोधि
रमंथ्यबंधि च॥४०॥ स्ववैश्वरूप्ये
ण सदानुभूतयाप्यपूर्ववद्विस्म
यमादधानया॥ गुणेन रूपेण विला
सचेष्टितैः सदा तवैवोचितया त
व श्रिया॥४१॥ तया सहासीनमनं
तभोगिनि प्रकृष्टविज्ञानबलैक
धामनि॥ फणामणिव्रातमयूख

मंडल प्रकाशमानोदर दिव्यधामनि ॥४२
निवास सय्यासन पादुकांशुकोपधा
न वर्षातप वारणादिभिः ॥ शरीरभेदै
स्तव शेषतां गतैर्यथोचितं शेष इती
र्यते जनैः ॥४३॥ दासः सखा वाहन मा
सनं ध्वजो यस्ते वितानं व्यजनं त्रयी
मयः ॥ उपस्थितं तेन पुरो गरु[illegible]ता
त्वदंघ्रि संमर्द किणांक शोभिना ॥४४
त्वदीय भुक्तोज्झित शेष भोजिना
त्वया विसृष्टात्म भरेण यद्यथा ॥ प्रिये
ण सेनापतिना निवेदिता तथानुजानं
तमुदार वीक्षणैः ॥४५॥ हताखिलक्ले
शमलैः स्वभावतः सदानुकूल्यैकर
सैस्तवोचितैः ॥ गृहीत तत्तत्परिचा
र साधने निषेव्यमाणं सचिवैर्यथो
चितम् ॥४६॥ अपूर्व नाना रस भावनि
र्भर प्रवृद्धया मुग्ध विदग्ध लीलया ॥
क्षणाणुपाक्षिप्त परादिकालया प्रहर्ष
यंतं महिषी महाभुजम् ॥४७॥ अचिं
त्य दिव्याद्भुत नित्य यौवन स्वभाव ला
वण्य मयामृतोदधिम् ॥ श्रियः श्रियं
भक्त जनैक जीवितं समर्थ मापत्स
खमर्थि कल्पकम् ॥४८॥ भवेत

मेवानुचरं निरंतरं प्रशांतनिःशेषमनोर
थांतरः॥ कदाहमैकांतिक नित्यकिंकरः
प्रहर्षयिष्यामि सनाथजीवितम्॥४९
धिगशुचिमविनीतं निर्दयंमामलज्जं
परमपुरुषयोऽहं योगिवर्याग्रणीभिः
विधिशिवसनकाद्यैर्ध्यातुमत्यंतदूरं
तवपरिजनभावं कामये कामवृत्तः॥
५०॥ अपराध सहस्र भाजनं पतितंभी
मभवार्णवोदरे॥ अगतिं शरणागतं हरे
कृपया केवल मात्म सात्कुरु॥५१॥
अविवेकघनांधदिङ्मुखे बहुधा संततदुः
खवर्षिणि॥ भगवन् भवदुर्दिने पथःस्ख
लितं मामवलोकयाच्युत॥५२॥ नमृषा
परमार्थमेव मे शृणु विज्ञापनमेकमग्र
तः॥ यदिमे न दयिष्यसे ततो दयनीय
स्तव नाथ दुर्लभः॥५३॥ तदहं त्वदृतेन
नाथवान्मदृते त्वं दयनीयवान्नच॥ वि
धिनिर्मितमेतदन्वयं भगवन् पालय
मास्म जीहपः॥५४॥ वपुरादिषु योपि
कोपि वा गुणतोऽसानि यथा तथा
विधः॥ तदहं तवपादपद्मयो रह
मद्यैव मया समर्पितः॥५५॥नम

नाथ यदस्ति योस्म्यहं सकलं तद्धि त
वैव माधव॥ नियतः स्वमिति प्रबुद्ध
धीरथवा किंनु समर्पयामि ते॥५६॥
अवबोधितवानिमां यथा मयि नि
त्यां भवदीयतां स्वयम्॥ कृपयैवम
नन्यभोग्यतां भगवन् भक्तिमपि प्र
यच्छमे॥५७॥ तव दास्यसुखैकसं
गिनां भवनेष्वस्त्वपि कीटजन्म मे॥
इतरावसथेषु मा स्म भूदपि मे जन्म
चतुर्मुखात्मना॥५८॥ सकृत्त्वदा
कार विलोकनाशया तृणीकृतानु
त्तमभुक्तिमुक्तिभिः॥ महात्मभिर्मा
मवलोक्यतां नय क्षणेपि ते यद्वि
रहोतिदुःसहः॥५९॥ न देहं न प्रा
णान्न च सुखमशेषाभिलषितं
न चात्मानं नान्यत्किमपि तव शे
षत्वविभवात्॥ वहिर्भूतं नाथ
क्षणमपि सहे शेषत्वविभवात्॥
यातु शतधा विनाशं तत्सत्यं मधु
मथन विज्ञापनमिदम्॥६०॥ दु
रंतस्यानादेरपरिहरणीयस्य म

हतो विहीनाचारोहं नृपशुरशु
भस्यास्पदमपि ।। दयासिंधो बंधो
निरवधिकवात्सल्यजलधे तव
स्मारं स्मारं गुणगणमितीच्छा
मि गतभीः ।।६१।। अनिच्छन्नप्ये
वं यदिपुनरपीच्छामि गतभीः
स्तवरजस्तवच्छन्नच्छद्मस्तुति
वचनभंगीमरचयम् ।। तथापी
त्थंरूपं वचनमवलंब्यापि कृप
या त्वमेवैवंभूतं धरणिधरमेशि
क्षय मनः ।।६२।। पिता त्वं माता त्वं
दयिततनयस्त्वं प्रियसुहृत्त्वमे
व त्वं मित्रं गुरुरपि गतिश्चासि
जगताम् ।। त्वदीयस्त्वद्भृत्यस्तव
परिजनस्त्वद्गतिरहं प्रपन्नश्चैवं
सत्यहमपि तवैवास्मि हि भरः ।।
६३।। जनित्वाहं वंशे महति जगति
ख्यातयशसां शुचीनां युक्तानां
गुणपुरुषतत्त्वस्थितिविदाम् ।।
निसर्गादेव त्वच्चरणकमलैकांत

मनसा मय्योघः पापात्मा शरणद नि
मज्जामि तमसि ॥६४॥ अमर्यादः
क्षुद्रश्चलमतिरसूया प्रसवभूः कृत
घ्नो दुर्मानी स्मरपरवशो वंचनपरः
नृशंसः पापिष्ठः कथमहमितो दुः
खजलधेरपारादुत्तीर्णस्तव प
रिचरेयं चरणयोः ॥६५॥ रघुवर
यदभूस्त्वं तादृशो वायसस्य प्रण
त इति दयालुर्यश्च चैद्यस्य कृष्ण
प्रतिभवमपराद्धुर्मुग्ध सायुज्यदो
भूर्वद किमु पदमागस्तस्य तेऽस्ति
क्षमायाः ॥६६॥ ननु प्रपन्नः सकृदेव
नाथ तवाहमस्मीति च याचमानः
तवानुकंप्यः स्मरतः प्रतिज्ञां मदेक
वर्जं किमिदं व्रतं ते ॥६७॥ अकृत्रि
मत्वच्चरणारविंद प्रेम प्रकर्षावधि
मात्मवंतम् ॥ पितामहं नाथमुनिं
विलोक्य प्रसीद मद्वृत्तमचिंतयि
त्वा ॥६८॥ यत्पदांभोरुहध्यानवि
ध्वस्ताशेषकल्मषः ॥ वस्तुता

मुपयातोहं यामुनेयं नमामि तम्
॥६॥
इति श्रीयामुनार्यविरचितमाल
वंदारस्तोत्रं सम्पूर्णम्॥
श्रीकृष्णार्पणमस्तु॥

श्रीमते रामानुजाय नमः॥ अनि
शं भजतामनन्यभाजां चरणांभो
रुहमादरेण पुंसाम्॥ वितरामि विवि
धां विभूतिमिष्टां जय रामानुजरं
गधाम्नि नित्यम्॥१॥ जयिनो विम
तांस्तरीयसक्तौ कुशलीभूय कुदृष्टि
भिस्समेतान्॥ शकलीपुरुषे विपक्षि
शेषान् जय रामानुज रंगधाम्नि नि
त्यम्॥२॥ जय मायिमतांधकारभा
नो जय बाह्यप्रमुखाटवीकृशानो॥
जय सम्मतसिंधुशीतभानो जयरा
मानुज रंगधाम्नि नित्यम्॥३॥ श्रु
तिसम्मतसुप्रमाणतत्वं कृपयाऽ
ऽलोच्य सुधासमानबुद्ध्या॥ अ

कृष्णा विततैक भाग्यरत्नं जयरामानु
जं एगधाम्नि नित्यम् ॥४॥
इति रामानुजचतुःश्लोकी समाप्ताः
श्रीकृष्णार्पणमस्तुः
श्रीराधाकृष्णाभ्यां नमो नमः
अथोत्तरशतं नामस्तोत्रं राधामनोह
रं ॥ एकैंच कृष्णाशस्य महामोक्ष
दायच ॥१॥ नमोस्तु राधागोपी नमो
नमो नमो कुरंगाक्षी चंचलाक्षी ॥ जै
सुन्दरी कारिणि कृष्णसंगमः गांधर्वि
जैजै [illegible] रु यस्मानुजाय ॥२॥ नमोस्तु
वीणापाणिभ्य रत्नोस्मितमुखी लोक
लतालयाच ॥ गोपेचरीगो वर्द्धन्य जै
जै नमो नमो वेषगोपी मनोहर ॥३॥
नमोस्तु चंद्रावलीस पत्नी कलावती
जैजै रूपिणी रम्या ॥ कृपावती जैजै
सुमती का नमो नमो तरुणी हृदयंग
मी ॥४॥ नमोस्तुते कृष्णप्रिया च जैजै
कृष्णशखी विपरीतारतिप्रिया ॥ न
मो प्रवीणा सुरतंच प्रीती नमोस्तु चं
द्रास्या चारु विग्रहा ॥५॥ नमोहरेः

कांता केकराक्षा नमो महालक्ष्मी: जे
सुकेलिनी॥ नमो मित्र संकेत वटस्थाना
नमोस्तु कमनीया कामिनी च॥६॥
नमोस्तु वृषभानु सुता मिराधा नमो
किसोरी ललिता लता जे॥ विद्युद्
द्युती जे कांच नाभा नमो कुमारी जे
मुग्ध वेशीनी॥७॥ जे केलिनी जे के
सवसस्वी जे नमो नमो नवनीतेक
विक्रया॥ जे षोडशाब्दा पूर्णकला
जे नमो नमो जारिणि जार संगिनी
८॥ नमो नमो वीरा वर्षिणी जे धीरा
धारा जे हर्षिणी च॥ धराधृति: जे
जे यौवनस्था नमो वनस्था मधुरा
कृति: जे॥९॥ मधुरा च वृषभानुपु
रापवासा जे मानलीला च विशारदा
य॥ जे रानलीला जे रान रात्री जे दं
डहस्ता च भ्रुवोन्नताय॥१०॥ जे
सुलनी मधुरास्या नमो नमो विंवो
ष्ठिणी जे पंच स्वराय॥ नमोस्तु सं
गीत कुसला च सेव्या नमो नमो
कृष्णवस्यत्व कारिणी॥११॥

नमो तारिणी हारिणी जैति ह्रीवा शीला च जै
लोला जै ललामिका ॥ नमो गोपाली प्रौढा च
मुग्धा जै मध्यका जै इधि विक्रये त्री ॥ १२ ॥
नमो स्वाधीनपतिका च यो त्ता जै खंडिका
जै जै चाभिसारिका ॥ नमो सुरतिका स्मि
नी च रस्या नमो रासरसा स्वस्थिकशोवधिः
१३ ॥ नमो पालिका लालिका जै नित लज्जा
जै लालसा जै ललना मणिः जै ॥ नमामि
बहुरूपा जै सुरूपा जै सुप्रसन्ना च मह
मतिः जै ॥ १४ ॥ नमो मरालमृगगमना च
मत्ता जै मंत्रिणी जै जै मंत्रनायिका ॥
नमामि मंत्रः रा जै के सेव्या नमामि मंत्रः
राजै कसिद्धिरा ॥ १५ ॥ अष्टादशाख्यं
लां नमस्ते अष्टासरानाशी वित्तनमस्ते ॥
प्रनासिनीं शर्वे वार्धं नमस्ते नमामि रा
धा राधा नमस्ते ॥ १६ ॥ देव्या ह्लादिका
नमामेतत्प्रश्ने तारं सततम् ॥ त्रिशंध्या
पठते नित्यं स भवेत् मानितं परम् ॥
१७ ॥
इति श्रीराधामस्तोत्रम् सम्पूर्णम्
श्रीराधाकृष्णार्पणमस्तु ः